শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীযামুনাচার্যৱিরচিতঃ

# ॥ গীতার্থসঙ্গ্রহঃ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ গীতার্থসঙ্গ্রহঃ ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

স্বধর্মজ্ঞানৱৈরাগ্য সাধ্য ভক্ত্যেকগোচরঃ।
নারাযণঃ পরং ব্রহ্ম গীতাশাস্ত্রে সমীরিতঃ॥ ১ ॥

জ্ঞানকর্মাত্মিকে নিষ্ঠে যোগলক্ষ্যে সুসংস্কৃতে।
আত্মানুভূতিসিদ্ধ্যর্থে পূর্ৱষটকেন চোদিতে॥ ২ ॥

মধ্যমে ভগৱত্তত্ত্বযাথাত্ম্যাৱাপ্তিসিদ্ধযে।
জ্ঞানকর্মাভিনির্ৱর্ত্যো ভক্তিযোগঃ প্রকীর্তিতঃ॥ ৩ ॥

প্রধান পুরুষৱ্যক্ত সর্ৱেশ্বর ৱিৱেচনম্।
কর্মধীর্ভক্তিরিত্যাদিঃ পূর্ৱশেষোন্তিমোদিতঃ॥ ৪ ॥

অস্থানস্নেহকারুণ্য ধর্মাধর্মধিযাকুলম্।
পার্থং প্রপন্নমুদ্দিশ্য শাস্ত্রাৱতরণং কৃতম্॥ ৫ ॥

নিত্যাত্মাসঙ্গকর্মেহাগোচরা সাঙখ্যযোগধীঃ।
দ্বিতীযে স্থিতধীলক্ষা প্রোক্তা তন্মোহশান্তযে॥ ৬ ॥

অসক্ত্যা লোকরক্ষাযৈ গুণেষৱারোপ্য কর্তৃতাম্।
সর্ৱেশ্বরে ৱা ন্যস্যোক্তা তৃতীযে কর্মকার্যতা॥ ৭ ॥

প্রসঙ্গাত্ স্ব স্বভাৱোক্তিঃ কর্মণোকর্মতাস্য চ।
ভেদা জ্ঞানস্য মাহাত্ম্যং চতুর্থাধ্যায উচ্যতে॥ ৮ ॥

কর্মযোগস্য সৌকর্যং শৈঘ্র্যং কাশ্চন তদ্বিধাঃ।
ব্রহ্মজ্ঞানপ্রকারশ্চ পঞ্চমাধ্যায উচ্যতে॥ ৯ ॥

যোগাভ্যাসৱিধির্যোগী চতুর্ধা যোগসাধনম্।
যোগসিদ্ধিস্স্বযোগস্য পারম্যং ষষ্ঠ উচ্যতে॥ ১০ ॥

www.prapatti.com

স্বযাথাত্ম্যং প্রকৃত্যাস্য তিরোধিশ্শরণাগতিঃ।
ভক্তভেদঃ প্রবুদ্ধস্য শ্রৈষ্ঠ্যং সপ্তম উচ্যতে॥ ১১ ॥

ঐশ্বর্যাক্ষরযাথাত্ম্য ভগৱচ্চরণার্থিনাম্।
ৱেদ্যোপাদেযভাৱানাম্ অষ্টমে ভেদ উচ্যতে॥ ১২ ॥

স্বমাহাত্ম্যং মনুষ্যত্বে পরত্বং চ মহাত্মনাম্।
ৱিশেষো নৱমে যোগো ভক্তিরূপঃ প্রকীর্তিতঃ॥ ১৩ ॥

স্বকল্যাণ গুণানন্ত্য কৃতস্ন স্বাধীনতামতিঃ।
ভক্ত্যুতপত্তি ৱিৱৃদ্ধ্যর্থা ৱিস্তীর্ণা দশমোদিতা॥ ১৪ ॥

একাদশে স্ব যাথাত্ম্য সাক্ষাতকারাৱলোকনম্।
দত্তমুক্তং ৱিদিপ্রাপ্ত্যোঃ ভক্ত্যেকোপাযতা তথা॥ ১৫ ॥

ভক্তেশশ্রৈষ্ঠ্যমুপাযোক্তিরশক্তস্যাত্মনিষ্ঠতা।
ততপ্রকারাস্তৱতিপ্রীতিঃ ভক্তে দ্বাদশ উচ্যতে॥ ১৬ ॥

দেহস্বরূপমাত্মাপ্তিহেতুরাত্মৱিশোধনম্।
বন্ধহেতুর্ৱিৱেকশ্চ ত্রযোদশ উদীর্যতে॥ ১৭ ॥

গুণবন্ধৱিধা তেষাং কর্তৃত্বং তন্নিৱর্তনম্।
গতিত্রযস্বমূলত্বং চতুর্দশ উদীর্যতে॥ ১৮ ॥

অচিন্মিশ্রাত্ ৱিশুদ্ধাচ্চ চেতনাত্ পুরুষোত্তমঃ।
ৱ্যাপনাদ্ভরণাত্ স্বাম্যাত্ অন্যঃ পঞ্চদশোদিতঃ॥ ১৯ ॥

দেৱাসুর ৱিভাগোক্তি পূর্ৱিকা শাস্ত্রৱশ্যতা।
তত্ত্বানুষ্ঠান ৱিজ্ঞানস্থেম্নে ষোডশ উচ্যতে॥ ২০ ॥

অশাস্ত্রমাসুরং কৃতস্নং শাস্ত্রীযং গুণতঃ পৃথক্।
লক্ষণং শাস্ত্র সিদ্ধস্য ত্রিধা সপ্তদশোদিতম্॥ ২১ ॥

ঈশ্বরে কর্তৃতা বুদ্ধিঃ সত্ত্বোপাদেযতান্তিমে।
স্বকর্ম পরিণামশ্চ শাস্ত্রসারার্থ উচ্যতে॥ ২২ ॥

www.prapatti.com

কর্মযোগস্তপস্তীর্থদান যজ্ঞাদিসেৱনম্।
জ্ঞানযোগো জিতস্বান্তৈঃ পরিশুদ্ধাত্মনি স্থিতিঃ॥ ২৩ ॥

ভক্তিযোগঃ পরৈকান্তপ্রীত্যা ধ্যানাদিষু স্থিতিঃ।
ত্রযাণামপি যোগানাং ত্রিভিরন্যোন্য সঙ্গমঃ॥ ২৪ ॥

নিত্যনৈমিত্তিকানাঞ্চ পরারাধনরূপিণাম্।
আত্মদৃষ্টেস্ত্রযোপ্যেতে যোগদ্বারেণ সাধকাঃ॥ ২৫ ॥

নিরস্তনিখিলাজ্ঞানো দৃষ্টৱাত্মানং পরানুগম্।
প্রতিলভ্য পরাং ভক্তিং তযৈৱাপ্নোতি ততপদম্॥ ২৬ ॥

ভক্তিযোগস্তদর্থী চেতসমগ্রৈশ্বর্যসাধকঃ।
আত্মার্থী চেত্ত্রযোপ্যেতে ততকৈৱল্যস্য সাধকাঃ॥ ২৭ ॥

ঐকান্ত্যং ভগৱত্যেষাং সমানমধিকারিণাম্।
যাৱতপ্রাপ্তি পরার্থী চেত্তদেৱাত্যন্তমশ্নুতে॥ ২৮ ॥

জ্ঞানী তু পরমৈকান্তী তদাযত্তাত্মজীৱনঃ।
ততসংশ্লেষ ৱিযোগৈক সুখদুঃখস্তদেকধীঃ॥ ২৯ ॥

ভগৱদ্ধ্যান যোগোক্তিৱন্দন স্তুতিকীর্তনৈঃ।
লব্ধাত্মা তদ্গতপ্রাণমনোবুদ্ধীন্দ্রিযক্রিযঃ॥ ৩০ ॥

নিজকর্মাদি ভক্ত্যন্তং কুর্যাত্ প্রীত্যৈৱ কারিতঃ।
উপাযতাং পরিত্যজ্য ন্যস্যেদ্দেৱে তু তামভীঃ॥ ৩১ ॥

একান্তাত্যন্ত দাস্যৈকরতিস্ততপদমাপ্নুযাত্।
ততপ্রধানমিদং শাস্ত্রমিতি গীতার্থসঙ্গ্রহঃ॥ ৩২ ॥

॥ ইতি গীতার্থসঙ্গ্রহঃ সমাপ্তঃ ॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥

www.prapatti.com